JETIR.ORG ISSN: 2349-5162 | ESTD Year : 2014 | Monthly Issue
JOURNAL OF EMERGING TECHNOLOGIES AND INNOVATIVE RESEARCH (JETIR)
An International Scholarly Open Access, Peer-reviewed, Refereed Journal

# "कालिदास: विवाहित:"

**शोधकर्त्ता:-**

**श्री सुरेश: कुमार: पण्डा, पि.एच्.डि. संस्कृत: विभाग:,**

**रेजिष्ट्रेसन नं- पि.एच्.डि./०७/२०१९/एस्.के.डि./१४६**

**श्री खुशाल दास विश्व विद्यालय:,**

**पिलिवंग: हनुमानगड:, राजस्थानम्, ३३५८०१,**

**सत्र: जुलाई २०१९**

**गाइड्:-**

**डा: सुभाष चन्द्र सैनि, आसोसिएट् प्रफेसर ।**

महाकवि: कालिदासरासीद् बिबाहित: । एक: बिबाहित: रति रसज्ञ: पुरुषेण यथा नारीणां नराणां च काम बिक्रियानि ज्ञातानि, एतानि तस्य कृतिषु प्रमाणितं भवन्ति । युवाहृदयस्य प्रेमच काम: उभयं तस्य लेखनिषु प्रतिफलितम् । बिबाह वर्णना, मधुशय्या, पति पत्नि उभयो: मिलनं विच्छेदं सुखदु:खं हर्षबिषादमादय: रोचकतया कबिना उपस्थाप्यन्ते । प्रेम बर्णनायां कबिना प्रकृते: उपमानानि संगृह्य उपमालंकाराणिबर्णितानि । सुरत क्रीडादि गर्भोदये नारीणामवस्थां तासां रुपं शिशुसन्तानस्य जन्म अनुमान बिभाबेन नैव भबिष्यति । सरासीत् बिबाहित: इति आद्ये ऋतुसंहारे काब्ये कथं परिज्ञायते बिचारयाम: । अत्र कविनाप्रिया, नवबिबाहिता पत्नी संबोध्य षडऋतुना बर्णना कृता । प्राण प्रियायैप्रेम पूर्णमर्घ्यरुपेण । ऋतुसंहारंसमर्पयति । प्रारंभेण संबोधनेन लिख्यते "समुपागतप्रिये" । ग्रीष्मऋतु: बर्णनायां प्रियतमां संबोध्य लिखति "निदाघकालोऽयमुपागत: प्रिये" (ऋ.ग्री.१) । कामिन्य: पट्टदुकुलेन पृथुनितम्बेन मेखलाभि: स्तनाभ्यां चन्दनै: तथा आभरणै: च स्नानान्तेकेशपाशान् सुगन्धितद्रब्यै: कामिन्य: ग्रीष्मतापमुपसमयन्ति (ऋ.ग्री-४) ।

स्त्रियः तुषारधवल मुक्ताहारैः बिमंडितैः सान्द्र चन्दनैः स्तनौ, सुवर्ण कटि मेखलया कामिन्यः केषां मनांसि न रंजयन्ति ।

**संदर्भ ग्रन्थसूची:-  डाः धनेश्वर महापात्र, कालिदास ग्रन्थावली, डाः त्रिनाथ पट्टनायक, कालिदास ग्रन्थावली**

१. प्रचण्डसूर्य्यः स्पृहणीयचन्द्रमा सदावगाह्यक्षतवारिसञ्चयः ।
दिनान्तरम्योऽभ्युपशान्तमन्मथो निदाघकालोऽयमुपागतः प्रिये ॥ (ऋ.ग्री.१)

२. नितम्बविम्बैः सदुकूलमेखलैः स्तनैः सहाराभरण्यैः सचन्दन्यैः ।
शिरोरुहैः स्नानकषायवासितैः स्त्रियो निदाघं शमयन्ति कामीनाम् ॥ (ऋ.ग्री.४)

पयोधराश्चन्दनपंकचर्चितास्तुषारगौरार्पिताहारशेखराः नितम्बदेशसह हेम मेखलाः प्रकुर्बते कस्य मनोन सोत्सुकां भवति (ऋ.ग्री ६) । चन्दन जलसिक्तैः ब्यजन पबनैः मुक्ताहार यष्टि युक्तैः स्तन मंडलैः बीणाध्वनिषु मधुरगानेषु एतैः वा सुप्त कन्दर्पः जाग्रतो भवति (ऋ.ग्री ८) ।

**संदर्भ ग्रन्थसूची:-  डाः धनेश्वर महापात्र, कालिदास ग्रन्थावली, डाः त्रिनाथ पट्टनायक, कालिदास ग्रन्थावली**

१. पयोधरा श्चन्दनपङ्कचर्चिता स्तुषारगौरार्पितहारशेखराः ।

नितम्बदेशाश्च सहहेममेखलाः प्रकुर्वते कस्य मनो न सोत्सुकम् ॥ (ऋ.ग्री.६)

२. सचन्दनाम्बुव्यजनोद्भवानिल्यैः सहारयष्टिस्तनमण्डलार्पण्यैः ।

सवल्लकीकाकलिगीतनिस्वन्यै र्विवोध्यते सुप्त इवाद्य मन्मथः ॥ (ऋ.ग्री.८)

## बर्षा

"...........कामिजनप्रिय: प्रिये" I (बर्षा १)

अत्र कालिदास: तस्य प्रियतमां प्रति संबोधनं कृत्वालिखति- प्रिये ! कामिजनानामतीव शौभाग्य बर्षा काल: राजाइव उपस्थित: I अधुना आकाशं परित: मेघे आच्छादित: I मेघ: कुत्र निलोत्पल पत्रमिव, कुत्र अंजन राशीब, कुत्रवा गर्भवती रमण्या: स्तन इव कान्तिं दधाति अत्र आलोचनीय: I गर्भधारी रमण्य: स्तनाकीदृशौभवन्ति वयं बिबाहितितोऽपि नजानीम I परंतु कालिदासेन यदि नैव बिबाहितमासीत् तर्हि गर्भवती रमणिनां स्तन युगं कीदृशी शोभा बर्द्धतेकथं स: जानाति I अत्र प्रिया नैव प्रेमिका परन्तु सा महाकबे: प्राणप्रिया धर्मपत्नी एवा (ऋ-ब.२) I ससिकराम्भोधर मत्तकुञ्जरस्तडित् पताकऽशनिशब्दमर्द्दल: समागतोराजबधुद्धतद्युतिर्घनागम: कामिजन: प्रिय: प्रियो I नितान्तनिलोत्पल पत्रकान्तिभि: क्वचिद् प्रभिन्नाजनराशि सनभै: I क्वचित् सगर्भप्रमदा स्तनप्रभै: समाचितंब्योमघनै: समन्तत: I

**संदर्भ ग्रन्थसूची:- डा: धनेश्वर महापात्र, कालिदास ग्रन्थावली, डा: त्रिनाथ पट्टनायक, कालिदास ग्रन्थावली**

५. ससीकराम्भोधरमत्तकुञ्जर स्तडित्पताकोऽशनिशब्दमर्दल: I

समागतो राजवदुद्धत द्युतिर्घनागम: कामिजनप्रिय: प्रिये II (ऋ.बर्षा.१)

६. नितान्तनीलोत्पलपत्रकान्तिभि: क्वचित्प्रभिन्नाञ्जनराशिसंनिभै: I

क्वचित् सगर्भप्रमदास्तनप्रभ्यै: समाचितं ब्योम घनै: समन्तत: II (ऋ.बर्षा.२)

नार्य्य: अंगेषु कृष्णागुरुचन्दनं बिलेप्य मस्तकेपुष्पाणिच खचयन्ति, केशपाशं सुबासितंकुर्बन्ति, संध्यायां मेघमेदुरे श्रुते गुरुजनान् गृहादागत्य शय्यागृहं प्रबिशन्ति I धर्मानुमोदितं काम: ऋतुसंहारस्य वर्णनाभिमुख्यम् I अत्र युबक अबस्थाया: संभोग श्रृंगारं दरिदृश्यते (बर्षा-२१) I कतितरुण्य: प्रबलयाकन्दर्पपीडाभि: संगीतानुरागं बिहाय कान्तानांहस्तं धृत्वापुष्पसुगन्धपरिपूर्णकेलिगृहं गच्छन्ति I ता: हस्तेषु पद्मपुष्पंधृत्वा शोभन्ते I तासां मुखमंडलानि पूर्णचन्द्रादपि बिजितानि (ऋ.शरद-२३) I सुरत बिलासिन्य तरुणय: रात्रौतासां तरुणकान्तै: सह यद् कामकेलिं सानन्देन उपभोगयन्ति, तद् अन्तरतमा सखिनामग्रे बर्णयन्ति I

तदा तासां मुखलाबाण्यानि अनुपमं शोभां धार्यन्ति । तरुणिनां मुखरतिश्रमेण कृशानि भवन्ति । मनसि हर्षेजातेऽपि ताः अधरेषु दन्त क्षतात् पीडया हसितुं न शक्नुवन्ति (ऋ.हेमन्त ६) ।

संदर्भ ग्रन्थसूची:- डाः धनेश्वर महापात्र, कालिदास ग्रन्थावली, डाः त्रिनाथ पट्टनायक, कालिदास ग्रन्थावली

१. कालागुरुप्रचुरचन्दनचर्च्चितांग्यः

पुष्पावतंससुरभीकृतकेशपाशाः ।

श्रुत्वा ध्वनिं जलमुचां त्वरितं प्रादोषे

शय्यागृहं गुरुगृहात् प्रबिशन्ति नार्य्यः ॥ (ऋ.बर्षा.२१)

२. करकमलमनोज्ञाः कान्तसंसक्तहस्ता

बदनविजितचन्द्राः काश्चिदन्यास्तरुण्यः ।

रचितकुसुमगन्धि प्रायशो यान्ति वेश्म

प्रबलमदनहेतोस्त्यक्तसङ्गीतरागाः ॥ (ऋ.शरद.२३)

३. रतिश्रमक्षामविपाण्डुवक्त्राः संप्राप्तहर्षाभ्युदयास्तरुण्यः ।

हसन्ति नोच्च्यैर्दशनाग्रभिन्नान् प्रपीडामानानधरानवेक्ष्य ॥ (ऋ.हेमन्त.६)

कति सुन्दरी स्त्रीयः दीर्घसमयं यावत् सुरतकेलिं कृत्वाक्लान्ताः भूत्वा यासामंगलतिकाः शिथिलाः भवन्ति, ताः अपघनतैलं हरिद्रादयः बिलेपयन्ति । तासां जघनानि तथा स्तनमंडलानि हर्षेणपुलकितानि भवन्ति । अन्या कति सुन्दरी स्त्रीयः दीर्घ समयं सूरतकेलिंकृत्वा दुर्वलाः भूत्वा तासामंगलतिकाः शिथिलाः भवन्ति । कबिः बक्ति, प्रिये ! अयं हेमन्त कालः तव सुखसंपादनं करोतु । प्रदिशतु हिमयुक्तोवः सुखं कालः एषः (हे-१९) । सुरत रसबिलासाः सत् सखिभिसमेनः असमशरबिनोदं सूचयन्ति प्रकाशम् । अनुपममुखरागाः रात्रिमध्ये बिनोदः शरदि तरुणकान्ताः सूचयन्ति प्रमोदान् (ऋ. शरद-१४) ।

हसन्ित नोचैः दर्शनाग्रभित्रान् प्रपीड्यमानान् अधरान् अबेक्ष्य । अन्या प्रकाम सुरत श्रमखिन्नदेहा रात्रिप्रजागरबिपाटल नेत्रपद्मा । शय्यान देशे लुलिताकुलकेशपाशानिद्रां प्रयाति मृदुसूर्य कराभितपता (ऋ.हे-१५) । अन्या श्चिरं सूरत केलिपारिश्रमेण खेदंगताः प्रशिथिलकृता गात्राः यष्टयः । संह्रस्यमाणं पुलोकरु पयोधरान्ता अभ्यंजनं बिदधति प्रमदाः शुशोभा (ऋ.हे.- १८) ।

संदर्भ ग्रन्थसूची:- डाः धनेश्वर महापात्र, कालिदास ग्रन्थावली, डाः त्रिनाथ पट्टनायक, कालिदास ग्रन्थावली

११. बहुगुणरमणीयो योषितां चित्तहारी
परिणतवहुशालिव्याकुलग्रामसीमा ।
विनिपतिततुषारः क्रौञ्चनादोपगीतः
प्रदिशतु हिमयुक्तो वः सुखं काल एषः ॥ (ऋ.हेमन्त.१९)

१२. शेफालिकाकुसुमगन्धमनोहराणि
स्वस्थस्थिताण्डजकुलप्रतिनादितानि ।
पर्य्यन्तसंस्थितमृगीनयनोप्तलानि
प्रोक्तण्ठयन्त्युपवनानि मनांसि पुंसाम् ॥ (ऋ.शरद. १४)

युबाप्रबलं कन्दर्पपीडयारात्रौ नबयौबनास्त्रीभिः साकं दीर्घसमयं सनिर्दयं रति क्रिडां कुर्बन्ति । अतः स्त्रीणां जघनानि खेदानि भवन्ति । रात्रौशेषे ताः धिरपदैः भ्रमन्ति (ऋ.शि.७) इत्थं शिशिर समयमेव त्वामुपोभोग्यं भवतु (ऋ.शि.१६) । इयंसृष्टिः कवेः अदम्य यौवनस्यालेखंबहति । अयि प्रिये ! सुमनोहरमाम्रमुकुलाः यस्यसर्बोत्तमं शराः नबपलाश यस्य धनुः, भ्रमराः यस्य धनुर्गुर्णं निर्मलं चन्द्रः यस्य निष्कलंकं श्वेत छत्रं, मलयपवनः यस्य मत्त हस्ति भ्रमराः यस्य भाटबर्गाः असौ भूवन बिजयी बसन्तबन्धुः कन्दर्पः तव सुख संपादनं करोतु । अत्र कबिः नूनं रतिरसज्ञः बिबाहितश्च । उत्तरमेघे अलकाबर्णनायां कबिः कथयति अलकायां प्रियपुरुषाः यदा शृंगारइचछायां प्रियाणां निवि बन्धान् शिथिलं कृत्वा चंचलं हस्ताभ्यां तासांपट्टबस्त्रान् लुण्ठन्ति, तदा ताः बिम्बाधरिण्यः लज्जाभिः उर्ध्वज्योति शिखान् मणिमय प्रदीपान् कुंकुंमादिचूर्ण मुष्टिकान् प्रक्षिपन्ति । किन्तु ताः बिफलाः भवन्ति । ताः किंकर्त्तब्यं बिमूढा भवन्ति ।

**संदर्भ ग्रन्थसूची:-** **डाः धनेश्वर महापात्र, कालिदास ग्रन्थावली, डाः त्रिनाथ पट्टनायक, कालिदास ग्रन्थावली**

१. प्रकामकामैर्युवभिः सुनिर्दयं, नशिासु दीर्घास्वभिरामिताश्चिरम् ।

भ्रमन्ति मन्दं श्रमखेदितोरवः, क्षपावसाने नवयौवनाः स्त्रियः ॥ (ऋ.शिशिर.७)

२. प्रचुरगुडविकारः स्मादुशालीक्षुरम्यः, प्रवलसुरतकेलिर्जातकन्दर्पदर्पः ।

प्रियजनरहितानां चित्तसन्तापहेतुः, शिशिरसम् एष श्रेयसे वोऽस्तु नित्यम् ॥ (ऋ.शिशिर.१६)

इत्थं मम गबेषणा पुस्तके महाकबेः रचनासु सुक्ष्माबलोकितेषु सः नूनं एकः हिन्दु-ब्राह्मणः तथा बिबाहितश्चासीत् । प्रकामकामैः युबभिः सुनिर्दयं निशासुदीर्घास्वभिरमिता श्चिरम् । शिशिर समय एष श्रेयसे बोऽस्तु नित्यम् (शि.ऋ.१६) । ज्ञाता स्वादो बिबृत जघनां कोबिहातुं समर्थः (पू.मे.४४) । निबिबन्धोच्छबसितशिथिलं यत्र बिम्बादराणां क्षौमंरागादनिभृतकरेष्वाक्षिपत्सु प्रियेषु । अर्चिस्तुंगानभिमुखमपि प्राप्यरत्नप्रदीपान् ह्रीमूढानां भवति बिफला प्रेरणाचूर्णमुष्ठिः (उ.मे.७) । अत्र मेघदूते खण्डकाव्ये यह कामी रतिरसमाश्वादयति । स कदापि विवृतजघनां विहाय अरमणं स्तातुं न शक्नोति । यदा प्रियपुरुषाः तेषां हस्तेषु प्रियाणाम् अन्तः वस्त्राणि तरया मोक्तुम् इच्धन्ति तदा विम्बाधराः प्रियाः तासां पुरुषाणां कृते सलज्जाः समुज्वलं रत्नं प्रदीपान् प्रति कुंकुमागुरुरागादीन् चूर्णमुष्टिन् प्रक्षिप्य आलोकशून्यं कर्त्तुमिच्छन्ति । परन्तु रत्न प्रदीपाः विलुप्ताः न भवन्ति । अतः ह्रीषु मुढतां प्रप्य ताः किंकर्त्तव्यं विमुढाः भवन्ति । <u>**संदर्भ ग्रन्थसूचीः- डाः धनेश्वर महापात्र, कालिदास ग्रन्थावली, डाः त्रिनाथ पट्टनायक, कालिदास ग्रन्थावली**</u>

१९. प्रकामकामैर्युवभिः सुनिर्दयं, निशासु दीर्घास्वभिरामिताश्चिरम् ।

भ्रमन्ति मन्दं श्रमखेदितोरवः, क्षपावसाने नवयौवनाः स्त्रियः ॥ (ऋ.शिशिर.७)

२०. प्रचुरगुडविकारः स्मादुशालीक्षुरम्यः, प्रवलसुरतकेलिर्जातकन्दर्पदर्पः ।

प्रियजनरहितानां चित्तसन्तापहेतुः, शिशिरसम् एष श्रेयसे वोऽस्तु नित्यम् ॥ (ऋ.शिशिर.१६)

२१. नीवीवन्धोच्छ्वसितशिथीलं यत्र बिम्बाधराणां, क्षौमं रागादनिभृतकरेष्वक्षिपत्सु प्रियेषु ।

अर्चिस्तुङ्गानभिमुखमपि प्राप्य रत्नप्रदीपान्, ह्रीमूढानां भवति विफलप्रेरणा चूर्ण्मुष्टिः ॥ (उ.मे.७)

## <u>उपसंहारः</u>

इत्थं महाकविः नारीणां नराणाञ्च श्रृंगाररसं वर्णनां कृत्वा तासांतेषांच रतिरसं वर्णयित्वा तस्य अदम्य यौवनस्य भावं प्रकटयति । पुनः ऋतुसंहारः एव तस्य प्रियायाः कृते प्रेम काव्यमिति सप्रेम उपहारमपि च परिज्ञायते । अत्र प्रिया न प्रेमिका परन्तु प्राणप्रिया पत्नी इति वक्तुमधिकं युक्तियुक्तम् । कवेः आद्य यौवनस्यालेख्वं वहति अयं ऋतुसंहारः काव्यः । यदि विद्योत्तमा विदुषी युवती कालिदासात्केवलमंगभंगी माध्यमेन पराभुताः न युक्तियुक्तमस्ति । यदि इत्थं भवति तर्हि विद्वानवर्गेषु अपि इत्थमुपायेन विदुषीं पराभूय कोऽपि बिबाहं कृतंस्यात् । अतः अस्ति कश्चित् वाक् विशेषः इति न युक्तियुक्तम् । अतः ऋतुसंहारे प्रचण्ड शब्दात्

प्रारम्भमस्ति सत्यमेतत् । आयौवनात् सः भगवत् प्रदत्तः प्रचण्ड प्रतिभाधरासीत् । ऋतुसंहार तस्य आद्य यौवनस्य पत्नीं प्रति सप्रेम उपहारम् । इति अहं मन्ये । विशेषे ऋतुसंहारः प्रारम्भं न भवति । परन्तु प्रचण्डशब्दात् प्रारम्भं भवति । तत् सूचयति यत् कस्यविज्ञजनस्य अस्तिकश्चित् कपोलकल्पितं भवेत् एवं ऋतुसंहारः एव तस्य आद्य यौवनस्य कृतिः । अतः अस्ति कश्चित् वाक् विशेषः इत्युक्ति न सत्यं वहति । परन्तु इदं सत्यं यत् ऋतुसंहारेव कालिदासस्य प्रेमपूर्ण काव्यं विद्यते । अनेन सः रसराजः महाकवि कालिदासः पूर्णयौवनस्य वर्णनां कृत्वा आद्य यौवने मूर्खमासीत् पुनः राजकुमारी विद्योत्तमाम् अंगुलिनिर्दिश्य जीतवान इति युक्तियुक्तं न मन्ये । परन्तु गभीरं श्रद्धाच विश्वासः तिष्ठतु । विद्वत्सु यतः महाकविः विश्वकविः सर्वे तं कपोलकल्पितमपि सत्यं प्रतिपादयितुं चेष्टन्ते । अतः इयंमपि मम दुर्वारः चेष्टा

| क्र.सं. | सांकेतिक पदानि |
|---|---|
| १. ऋ.ग्री.१ | ऋतुसंहारः ग्रीष्म-१ |
| २. ऋ.ग्री.४ | ऋतुसंहारः ग्रीष्म-४ |
| ३. ऋ.ग्री.६ | ऋतुसंहारः ग्रीष्म-६ |
| ४. ऋ.ग्री.८ | ऋतुसंहारः ग्रीष्म-८ |
| ५. ऋ.ब.१ | ऋतुसंहारः बर्षा-१ |
| ६. ऋ.ब.२ | ऋतुसंहारः बर्षा-२ |
| ७. ऋ.ब.२१ | ऋतुसंहारः बर्षा-२१ |
| ८. ऋ.ब.२३ | ऋतुसंहारः बर्षा-२३ |
| ९. ऋ.हे.६ | ऋतुसंहारः हेमन्त-६ |
| १०. ऋ.हे.१८ | ऋतुसंहारः हेमन्त-१८ |
| ११. ऋ.हे.१९ | ऋतुसंहारः हेमन्त-१९ |
| १२. ऋ.श.१४ | ऋतुसंहारः शरद-१४ |
| १३. ऋ.हे.६ | ऋतुसंहारः हेमन्त-६ |
| १४. ऋ.हे.१५ | ऋतुसंहारः हेमन्त-१५ |
| १५. ऋ.हे.१८ | ऋतुसंहारः हेमन्त-१८ |
| १६. ऋ.शि.७ | ऋतुसंहारः शिशिर-७ |
| १७. ऋ.शि.१६ | ऋतुसंहारः शिशिर-१६ |
| १८. पू.मे.४४ | पूर्वमेघः४४ |
| ११. उ.मे.७ | उत्तर मेघः ७ |